Chanakya (Kautilya) Niti Sutra

ચાણક્યાનિ અથવા કૌટિલીયાનિ નીતિસૂત્રાણિ

Document Information

Text title : Chanakya Niti Sutra

File name : chANakyasUtra.itx

Category : sUtra, major_works, chANakya

Location : doc_z_misc_major_works

Author : Chanakya (aka Kautilya)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : April, 24, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

sanskritdocuments.org

ચાણક્યાનિ અથવા કૌટિલીયાનિ નીતિસૂત્રાણિ

અથ પ્રથમોऽધ્યાયઃ ॥

સા શ્રીર્વોઽવ્યાત્ ॥ ૧ ॥

સુખસ્ય મૂલં ધર્મઃ ॥ ૨ ॥

ધર્મસ્ય મૂલમર્થઃ ॥ ૩ ॥

અર્થસ્ય મૂલં રાજ્યમ્ ॥ ૪ ॥

રાજ્યમૂલમિન્દ્રિયજયઃ ॥ ૫ ॥

ઇન્દ્રિયજયસ્ય મૂલં વિનયઃ ॥ ૬ ॥

વિનયસ્ય મૂલં વૃદ્ધોપસેવા ॥ ૭ ॥

વૃદ્ધસેવાયા વિજ્ઞાનમ્ ॥ ૮ ॥

વિજ્ઞાનેનાત્માનં સમ્પાદયેત્ ॥ ૯ ॥

સમ્પાદિતાત્મા જિતાત્મા ભવતિ ॥ ૧૦ ॥

જિતાત્મા સર્વાર્થૈઃ સંયુજ્યતે ॥ ૧૧ ॥

સ્વામિસમ્પત્ પ્રકૃતિસમ્પદં કરોતિ ॥ ૧૨ ॥

પ્રકૃતિસમ્પદા હ્યનાયકમપિ રાજ્યં નીયતે ॥ ૧૩ ॥

પ્રકૃતિકોપઃ સર્વકોપેભ્યો ગરીયાન્ ॥ ૧૪ ॥

અવિનીતસ્વામિભાવાદસ્વામિભાવઃ શ્રેયાન્ ॥ ૧૫ ॥

સમ્પાદ્યાત્માનમન્વિચ્છેત્ સહાયાન્ ॥ ૧૬ ॥

નાऽસહાસ્ય મન્ત્રનિશ્ચયઃ ॥ ૧૮ ॥

નૈકં ચક્રં પરિભ્રમતિ ॥ ૧૯ ॥

સહાયઃ સમો દુઃખસુખયોઃ ॥ ૧૭॥

માની પ્રતિમાનિનમાત્મદ્વિતીયં મન્ત્રિણમુત્પાદયેત્ ॥ ૨૦॥

અવિનીતં સ્નેહમાત્રેણ ન મન્ત્રે કુર્વીત ॥ ૨૧॥

શ્રુતવન્તમુપધાશુદ્ધં મન્ત્રિણં કુર્વીત ॥ ૨૧॥

મન્ત્રમૂલાઃ સર્વારમ્ભાઃ ॥ ૨૨॥

મન્ત્રસંવરણે કાર્યસિદ્ધિર્ભવતિ ॥ ૨૩॥

મન્ત્રનિઃસ્રાવઃ સર્વમ્ નાશયતિ ॥ ૨૪॥

પ્રમાદાદ્ દ્વિષતાં વશમુપયાસ્યતિ ॥ ૨૫॥

સર્વદ્વારેભ્યો મન્ત્રો રક્ષિતવ્યઃ ॥ ૨૬॥

મન્ત્રસમ્પદા હિ રાજ્યં વિવર્ધતે ॥ ૨૭॥

શ્રેષ્ઠતમાં મન્ત્રગુપ્તિમાહુઃ ॥ ૨૮॥

કાર્યાકાર્ય પ્રદીપો મન્ત્રઃ ॥ ૨૯॥

મન્ત્રચક્ષુષા પરચ્છિદ્રાણ્યવલોકયન્તિ ॥ ૩૧ ।
મન્ત્રકાલે ન મત્સરઃ કર્તવ્યઃ ॥ ૩૧॥

અકામબુદ્ધયો મન્ત્રતત્ત્વાર્થદર્શિનો મન્ત્રિણઃ ॥ ૩૪॥

ષટ્કર્ણો મન્ત્રશ્છિદ્યતે ॥ ૩૨॥

ત્રયાણામૈકવાક્યેઽસમ્પ્રત્યયઃ ॥ ૩૩॥

આપત્સુ સ્નેહયુક્તં મિત્રમ્ ॥ ૩૫॥

મિત્રસંગ્રહણે બલં સમ્પદ્યતે ॥ ૩૬॥

બલવાન્ અલબ્ધલાભે પ્રયતેત ॥ ૩૭॥

અલબ્ધલાભો નાલસસ્ય ॥ ૩૮॥

અલસેન લબ્ધમપિ રક્ષિતું ન શક્યતે ॥ ૩૯॥

ન ચાલસસ્યયુક્તસ્ય રક્ષિતં વિવર્ધતે ॥ ૪૦॥

ન ભૃત્યાન્ પોષયતિ ॥ ૪૧॥

ન તીર્થં પ્રતિપાદયતિ ॥ ૪૨॥

અલબ્ધલાભાદિચતુષ્ટયં રાજતન્ત્રમ્ ॥ ૪૩॥

તચ્ચ રાજ્યતન્ત્રમાયતં નીતિશાસ્ત્રેષુ ॥ ૪૪॥

રાજ્યતન્ત્રેષ્વાયત્તૌ મન્ત્રાવાપૌ ॥ ૪૫॥

મન્ત્રં સ્વવિષયે કૃત્યેષ્વાયત્તમ્ ॥ ૪૬॥

આવાપો મણ્ડલે સન્નિવિષ્ટઃ ॥ ૪૬॥

સન્ધિવિગ્રહયોર્યોનિર્મણ્ડલમ્ ॥ ૪૮॥

નીતિશાસ્ત્રાનુગો રાજા ॥ ૪૯॥

અનન્તરપ્રકૃતિઃ શત્રુઃ ॥ ૫૦॥

એકાન્તરિતં મિત્રમિષ્યતે ॥ ૫૧॥

હેતુતઃ શત્રુમિત્રે ભવિષ્યતઃ ॥ ૫૨॥

હીયમાનેન સ સન્ધિં કુર્વીત ॥ ૫૩॥

તેજો હિ સન્ધાનહેતુસ્તદર્થિનામ્ ॥ ૫૪॥

નાતપ્તલોહં લોહેન સન્ધત્તે ॥ ૫૫॥

બલવાન્ હીનેન વિગૃહ્ણીયાત્ ॥ ૫૬॥

ન જ્યાયસા સમેન વા ॥ ૫૭॥

હસ્તિનઃ પાદયુદ્ધમિવ બલવદ્વિગ્રહઃ ॥ ૫૮ ।
આમપાત્રમાપેન સહ વિનશ્યતિ ॥ ૫૯॥

અરિપ્રયત્નમભિસમીક્ષ્યાત્મરક્ષયા વસેત્ ॥ ૬૦॥

સન્ધાયૈકતો વા યાયાત્ ॥ ૫૮॥

અમિત્રવિરોધાદાત્મરક્ષામાવસેત્ ॥ ૫૯॥

શક્તિહીનો બલવન્તમાશ્રયેત્ ॥ ૬૧॥

દુર્બલાશ્રયો દુઃખમાવહતિ ॥ ૬૨॥

અગ્નિવદ્ રાજાનમાશ્રયેત્ ॥ ૬૩॥

રાજ્ઞાઃ પ્રતિકૂલં નાચરેત્ ॥ ૬૪॥

નોદ્ધતવેશધરઃ સ્યાત્ ॥ ૬૬॥

ન દેવચરિતં ચરેત્ ॥ ૬૫॥

દ્વયોરપીર્ષ્યતોર્દ્વૈધીભાવકુર્વીત ॥ ૬૭॥

ન વ્યસનપરસ્ય કાર્યાવાપ્તિઃ ॥ ૬૮॥

ઇન્દ્રિયવશવર્તિનો નાસ્તિ કાર્યાવાપ્તિઃ ॥ ૬૯॥

નાસ્તિ કાર્યં દ્યુતપ્રવૃત્તસ્ય ॥ ૭૦॥

મૃગયાપરસ્ય ધર્માર્થૌ વિનશ્યતઃ ॥ ૭૧॥

ન કામાસક્તસ્ય કાર્યાનુષ્ઠાનમ્ ॥ ૭૩॥

અર્થેષુ પાનવ્યસની ન ગણ્યતે ॥ ૭૨॥

અર્થદૂષકં શ્રીઃ પરિત્યજતિ ॥ ૭૬॥

અગ્નિદહાદપિ વિશિષ્ટં વાક્પારુષ્યમ્ ॥ ૭૪॥

દણ્ડપારુષ્યાત્ સર્વજનદ્વેષ્યો ભવતિ ॥ ૭૫॥

અમિત્રો દણ્ડનીત્યામાયત્તઃ ॥ ૭૭॥

દણ્ડનીતિમનુષ્ઠન્ પ્રજાઃ સંરક્ષતિ ॥ ૭૮॥

દણ્ડઃ સર્વસમ્પદા યોજયતિ ॥ ૭૯॥

દણ્ડાભાવે ત્રિવર્ગાભાવઃ ॥ ૮૦॥

દણ્ડભયાદકાર્યાણિ ન કુર્વન્તિ ॥ ૮૧॥

દણ્ડનીત્યામાયત્તમાત્મરક્ષણમ્ ॥ ૮૨॥

આત્મનિ રક્ષિતે સર્વં રક્ષિતં ભવતિ ॥ ૮૩॥

આત્માયત્તૌ વૃદ્ધિવિનાશૌ ॥ ૮૪॥

દણ્ડનીત્યાદિ વિજ્ઞાને પ્રણીયતે ॥ ૮૫॥

દુર્બલોઽપિ રાજા નાવમન્તવ્યઃ ॥ ૮૬॥

નાસ્ત્યગ્નેર્દૌર્બલ્યમ્ ॥ ૮૭॥

દણ્ડેન પ્રણીયતે વૃત્તિઃ ॥ ૮૮॥

વૃત્તિમૂલોઽર્થલાભઃ ॥ ૮૯॥

અર્થમૂલૌ ધર્મકામૌ ॥ ૯૦॥

અર્થમૂલમ્ કાર્યમ્ ॥ ૯૧॥

યત્નપ્રયત્નાત્ કાર્યસિદ્ધિર્ભવતિ સ ઉપાયઃ ॥ ૯૨॥

ઉપાયપૂર્વં કાર્યં ન દુષ્કરં સ્યાત્ ॥ ૯૩॥

અનુપાયપૂર્વં કાર્યં કૃતમપિ વિનશ્યતિ ॥ ૯૪॥

કાર્યાર્થિનામુપાય એવ સહાયઃ ॥ ૯૫॥

કાર્યં પુરુષકારેણ લક્ષ્યં સમ્પદ્યતે ॥ ૯૬॥

પુરુષકારમનુવર્તતે દૈવમ્ ॥ ૯૭॥

દૈવં વિના અતિપ્રયત્નં કરોતિ યત્તદ્ વિફલમ્ ॥ ૯૮॥

અનીહમાનસ્ય વૃત્તિર્ન સમ્પદ્યતે ॥ ૯૯॥

પૂર્વં નિશ્ચિત્ય પશ્ચાત્કાર્યમારભેત ॥૧૦૦॥

ઇતિ ચાણક્યસૂત્રે પ્રથમોઽધ્યાયઃ ॥

અથ દ્વિતીયોઽધ્યાયઃ ॥

અર્થમૂલં સર્વકાર્યં યદલ્પપ્રયત્નાત્ કાર્યસિદ્ધિર્ભવતિ ॥ ૧॥

ઉપાયપૂર્વં કાર્યં ન દુષ્કરં સ્યાત્ ॥ ૨॥

અનુપાયપૂર્વકાર્યં કૃતમપિ વિનશ્યતિ ॥ ૩॥

કાર્યાર્થિનામુપાય એવ સહાયઃ ॥ ૪॥

કાર્યં પુરુષકારેણ લક્ષ્યં સમ્પદ્યતે ॥ ૫॥

પુરુષકારમનુવર્તતે દૈવમ્ ॥ ૬॥

દૈવં વિનાઽતિપ્રયત્નં યત્કરોતિ તદ્વિફલમ્ ॥ ૭॥

અસમાહિતસ્ય કાર્યં ન વિદ્યતે ॥ ૮॥

પૂર્વં નિશ્ચિત્ય પશ્ચાત્કાર્યમારભેત ॥ ૯॥

કાર્યાન્તરે દીર્ઘસૂત્રતા ન કર્તવ્યા ॥ ૧૦॥

ન ચલચિત્તસ્ય કાર્યાવાપ્તિઃ ॥ ૧૧॥

હસ્તગતાવમાનનાત્ કાર્યવ્યતિક્રમો ભવતિ ॥ ૧૨॥

દોષવર્જિતાનિ કાર્યાણિ દુર્લભાનિ ॥ ૧૩॥

દુરનિબન્ધં કાર્યં ન આરભેત ॥ ૧૪॥

કાલવિત્ કાર્યં સાધયેત્ ॥ ૧૫॥

કાલાતિક્રમાત્ કાલ એવ ફલં પિબતિ ॥ ૧૬॥

ક્ષણં પ્રતિ કાલવિક્ષેપં ન કુર્યાત્ સર્વકૃતેષુ ॥ ૧૭॥

દેશકાલવિભાગૌ જ્ઞાત્વા કાર્યમારભેત ॥ ૧૮॥

દૈવહીનં કાર્યં સુસાધમપિ દુસ્સાધં ભવતિ ॥ ૧૯॥

નીતિજ્ઞો દેશકાલૌ પરીક્ષેત ॥ ૨૦॥

પરીક્ષ્યકારિણિ શ્રીશ્ચિરં તિષ્ઠતિ ॥ ૨૧॥

સર્વાશ્ચ સમ્પદઃ સર્વોપાયેન પરિગૃહ્ણીયાત્ ॥ ૨૨॥

ભાગ્યવન્તમપ્યપરીક્ષ્યકારિણં શ્રીઃ પરિત્યજતિ ॥ ૨૩॥

જ્ઞાત્વાઽનુમાનૈશ્ચ પરીક્ષા કર્તવ્યા ॥ ૨૪॥

યો યસ્મિન્કર્મણિ કુશલસ્તં તસ્મિન્નેવ યોજયેત્ ॥ ૨૫॥

દુસ્સાધમપિ સુસાધં કરોત્યુપાયજ્ઞઃ ॥ ૨૬॥

અજ્ઞાનિના કૃતમપિ ન બહુમન્તવ્યં યાદૃચ્છિકત્વાત્ ॥ ૨૭॥

કૃમયોઽપો હિ કદાચિત્ રૂપાન્તરાણિ કુર્વન્તિ ॥ ૨૮॥

સિદ્ધસ્યૈવ કાર્યસ્ય પ્રકાશનં કર્તવ્યમ્ ॥ ૨૯॥

જ્ઞાનવતામપિ દૈવમાનુષદોષાત્ કાર્યાણિ દુષ્યન્તિ ॥ ૩૦॥

દૈવં દોષં શાન્તિકર્મણા પ્રતિષેધયેત્ ॥ ૩૧॥

માનુષીં કાર્યવિપત્તિં કૌશલેન વિનિવારયેત્ ॥ ૩૨॥

કાર્યવિપત્તૌ દોષાન્ વર્ણયન્તિ બાલિશાઃ ॥ ૩૩॥

કાર્યાર્થિના દાક્ષિણ્યં ન કર્તવ્યમ્ ॥ ૩૪॥

ક્ષીરાર્થિ વત્સો માતુરૂધઃ પ્રતિહન્તિ ॥ ૩૫॥

અપ્રયત્નાત્ કાર્યવિપત્તિર્ભવેત્ ॥ ૩૬॥

ન દૈવમાત્રપ્રમાણાનાં કાર્યસિદ્ધિઃ ॥ ૩૭॥

કાર્યબાહ્યો ન પોષયત્યાશ્રિતાન્ ॥ ૩૮॥

યઃ કાર્યં ન પશ્યતિ સોઽન્ધઃ ॥ ૩૯॥

પ્રત્યક્ષપરોક્ષનુમાનૈઃ કાર્યાણિ પરીક્ષેત ॥ ૪૦॥

અપરીક્ષકારિણં શ્રીઃ પરિત્યજતિ ॥ ૪૧॥

પરીક્ષ્ય તાર્યા વિપત્તિઃ ॥ ૪૨॥

સ્વશક્તિં જ્ઞાત્વા કાર્યમારભેત ॥ ૪૩॥

સ્વજનં તર્પયિત્વા યશ્શેષભોજી સોઽમૃતભોજી ॥ ૪૪॥

સમ્યગનુષ્ઠાનાદાયમુખાનિ વર્ધન્તે ॥ ૪૫॥

નાસ્તિ ભીરોઃ કાર્યચિન્તા ॥ ૪૬॥

સ્વામિનઃ શીલં જ્ઞાત્વા કાર્યાર્થી કાર્યં સાધયેત્ ॥ ૪૭॥

ધેનોશ્શીલજ્ઞો હિ ક્ષીરં ભુઙ્ક્તે ॥ ૪૮॥

ક્ષુદ્રે ગુહ્યપ્રકાશનમાત્મવાન્ ન કુર્યાત્ ॥ ૪૯॥

આશ્રિતૈરપ્યવમન્યતે મૃદુસ્વભાવઃ ॥ ૫૦॥

તીક્ષ્ણદણ્ડઃ સર્વેષામુદ્વેજનીયો ભવતિ ॥ ૫૧॥

યથાર્હદણ્ડકારી સ્યાત્ ॥ ૫૨॥

અલ્પસારં શ્રુતવન્તમપિ ન બહુમન્યતે લોકઃ ॥ ૫૩॥

અતિભારઃ પુરુષમવસાદયતિ ॥ ૫૪॥

યઃ સંસદિ પરદોષં શંસતિ સ સ્વદોષબહુત્વમેવ પ્રખ્યાપયતિ ॥ ૫૫॥

આત્માનમેવ નાશયત્યનાત્મવતાં કોપઃ ॥ ૫૬॥

નાસ્ત્યપ્રાપ્યં સત્યવતામ્ ॥ ૫૭॥

ન કેવલેન સાહસેન કાર્યસિદ્ધિર્ભવતિ ॥ ૫૮

વ્યસનાર્તો વિસ્મરત્યવશ્યકર્તવ્યાન્ ॥ ૫૯॥

નાસ્ત્યનન્તરાયઃ કાલવિક્ષેપે ॥ ૬૦॥

અસંશયવિનાશાત્ સંશયવિનાશઃ શ્રેયા ॥ ૬૧॥

કેવલં ધનાનિ નિક્ષેપ્તું ન સ્વાર્થં ન દાનં ન ધર્મઃ ॥ ૬૨॥

નાર્યા આગતોઽર્થઃ તદ્વિપરીતમનર્થભાવં ભજતે ॥ ૬૩॥

યો ધર્માર્થૌ ન વ્યર્થયતિ સ કામઃ તદ્વિપરીતોઽનર્થસેવી ॥ ૬૪॥

ઋજુસ્વભાવપ્રો જનો દુર્લભઃ ॥ ૬૫॥

અવમાનેનાગતમૈશ્વર્યમવમન્યત એવ સાધુઃ ॥ ૬૬॥

બહૂનપિ હિ ગુણાનેકદોષો ગ્રસતિ ॥ ૬૭॥

મહાત્મના પરં સાહસં ન કર્તવ્યમ્ ॥ ૬૮॥

કદાચિદપિ ચારિત્રં ન લઙ્ઘયેત્ ॥ ૬૯॥

ક્ષુધાઽઽર્તો ન તૃણં ચરતિ સિંહઃ ॥ ૭૦॥

પ્રાણાદપિ પ્રત્યયો રક્ષિતવ્યઃ ॥ ૭૧॥

પિશુનો નેતા પુત્રદારૈરપિ ત્યજ્યતે ॥ ૭૨॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ॥

અથ તૃતીયોઽધ્યાયઃ ॥

બાલાદપિ યુક્તમર્થં શ‌ૃણુયાત્ ॥ ૧॥

સત્યમપ્યશ્રદ્ધેયં ન વદેત્ ॥ ૨॥

નાલ્પદોષાદ્બહુગુણાસ્ત્યજ્યન્તે ॥ ૩॥

વિપશ્ચિત્સ્વપિ સુલભા દોષાઃ ॥ ૪॥

નાસ્તિ રત્નમખણ્ડિતમ્ ॥ ૫॥

મર્યાદાતીતં ન કદાચિદપિ વિશ્વસેત્ ॥ ૬॥

અપ્રિયે કૃતે પ્રિયમપિ દ્વેષ્યં ભવતિ ॥ ૭॥

નમન્ત્યપિ હિ તુલાકોટિઃ કૂપોદકક્ષયં કરોતિ ॥ ૮॥

સતાં મતં નાતિક્રામેત્ ॥ ૯॥

ગુણવદાશ્રયાન્ નિર્ગુણોઽપિ ગુણી ભવતિ ॥ ૧૦॥

ક્ષીરાશ્રિતં જલં ક્ષીરમિવ ભવતિ ॥ ૧૧॥

મૃત્પિણ્ડેઽપિ પાટલિપુષ્પં સ્વગન્ધમુત્પાદયતિ ॥ ૧૨॥

રજતં કનકસઙ્ગાત્ કનકં ભવતિ ॥ ૧૩॥

ઉપકર્તર્યપકર્તુમિચ્છત્યબુધઃ ॥ ૧૪॥

ન પાપ કર્મણામાક્રોશભયમ્ ॥ ૧૫॥

ઉત્સાહવતાં શત્રવોઽપિ વશીભવન્તિ ॥ ૧૬॥

વિક્રમધના હિ રાજાનઃ ॥ ૧૭॥

નાસ્ત્યાલસ્યૈહિકમામુષ્મિકં વા ॥ ૧૮॥

નિરુત્સાહાદ્દૈવં પતતિ ॥ ૧૯॥

મત્સ્યાર્થીવ જાલમુપયુજ્યાર્થં ગૃહ્ણીયાત્ ॥ ૨૦॥

અવિશ્વસ્તેષુ વિશ્વસો ન કર્તવ્યઃ ॥ ૨૧॥

વિષં વિષમેવ સાર્વકાલમ્ ॥ ૨૨॥

અર્થસમાદાને વૈરિણાં સઙ્ગ એવ ન કર્તવ્યઃ ॥ ૨૩॥

અર્થસિદ્ધૌ વૈરિણં ન વિશ્વસેત્ ॥ ૨૪॥

અર્થાધીન એવ નિયતસમ્બન્ધઃ ॥ ૨૫॥

શત્રોરપિ સુતઃ સખા રક્ષિતવ્યઃ ॥ ૨૬॥

યાવચ્છત્રોશ્છિદ્રં પશ્યતિ તાવદ્ધસ્તેન વા સ્કન્ધેન વા સંવાહ્યઃ છિદ્રે તુ પ્રહરેત્ ॥ ૨૭॥

આત્મછિદ્રં ન પ્રકાશયેત્ ॥ ૨૮॥

છિદ્રપ્રહારિણઃ શત્રવોઽપિ ॥ ૨૯॥

હસ્તગતમપિ શત્રું ન વિશ્વસેત્। ૩૦॥

સ્વજનસ્ય દુર્વૃતં નિવારયેત્ ॥ ૩૧॥

સ્વજનાવમાનોઽપિ મનસ્વિનાં દુઃખમાવહતિ ॥ ૩૨॥

એકાઙ્ગદોષઃ પુરુષમવસાદયતિ ॥ ૩૩॥

શત્રું જયતિ સુવૃત્તતા ॥ ૩૪॥

નિકૃતિપ્રિયા નીચાઃ ॥ ૩૫॥

નીચસ્ય મતિર્ન દાતવ્યા ॥ ૩૬॥

નીચેષુ વિશ્વાસો ન કર્તવ્યઃ ॥ ૩૭॥

સુપૂજિતોઽપિ દુર્જનઃ પીડયત્યેવ ॥ ૩૮॥

ચન્દનદીનપિ દાવોઽગ્નિર્દહત્યેવ ॥ ૩૯॥

કદાઽપિ કમપિ પુરુષં નાવમન્યેત ॥ ૪૦॥

ક્ષન્તવ્યમિતિ પુરુષં ન બાધેત ॥ ૪૧॥

ભર્ત્રાઽધિકં રહસ્યુક્તં વક્તુમચ્છિન્ત્યબુધઃ ॥ ૪૨॥

અનુરાગસ્તુ ફલેન (હિતેન) સૂચ્યતે ॥ ૪૩॥

આજ્ઞાફલમૈશ્વર્યમ્ ॥ ૪૪॥

દાતવ્યમપિ બાલિશઃ પરિક્લેશેન દાસ્યતિ ॥ ૪૫॥

મહદૈશ્વર્યં પ્રાપ્યાપિ અધૃતિમાન્ વિનશ્યતિ ॥ ૪૬॥

નાસ્ત્યધૃતેરૈહિકમામુષ્મિકં વા ॥ ૪૭॥

ન દુર્જનૈઃ સહ સંસર્ગઃ કર્તવ્યઃ ॥ ૪૮॥

શૌણ્ડહસ્તગતં પયોઽપ્યવમન્યતે જનઃ ॥ ૪૯॥

કાર્યસઙ્કટેષ્વર્થવ્યવસાયિની બુદ્ધિઃ ॥ ૫૦॥

મિતભોજનં સ્વાસ્થ્યમ્ ॥ ૫૧॥

પથ્યમપ્યપથ્યાજીર્ણે નાશ્નીયાત્ ॥ ૫૨॥

જીર્ણભોજિનં વ્યાધિર્નોપસર્પતિ ॥ ૫૩॥

જીર્ણશરીરે વર્ધમાનં વ્યાધિં નોપેક્ષેત ॥ ૫૪॥

અજીર્ણે ભોજનં દુઃખમ્ ॥ ૫૫॥

શત્રોરપિ વિશિષ્યતે વ્યાધિઃ ॥ ૫૬॥

દાનં નિધાનમનુગામિ ॥ ૫૭॥

પટુતરેઽપિ તૃષ્ણાપરે સુલભમતિસન્ધાનમ્ ॥ ૫૮॥

તૃષ્ણયા મતિશ્છાદ્યતે ॥ ૫૯॥

કાર્યબહુત્વે બહુફલમાયતિકં કુર્યાત્ ॥ ૬૦॥

સ્વયમેવાવસ્કન્નં કાર્યં નિરીક્ષેત ॥ ૬૧॥

મૂર્ખેષુ સાહસં નિયતમ્ ॥ ૬૨॥

મૂર્ખેષુ વિવાદો ન કર્તવ્યઃ ॥ ૬૩॥

મૂર્ખેષુ મૂર્ખવદેવ કથયેત્ ॥ ૬૪॥

આયસૈરાયસં છેદ્યમ્ ॥ ૬૫॥

નાસ્ત્યધીમતસ્સખા ॥ ૬૬॥

ઇતિ તૃતીયોઽધ્યાયઃ ॥

અથ ચતુર્થોઽધ્યાયઃ ॥

ધર્મેણ ધાર્યતે લોકઃ ॥ ૧॥

પ્રેતમપિ ધર્માધર્માવનુગચ્છતઃ ॥ ૨॥

દયા ધર્મસ્ય જન્મભૂમિઃ ॥ ૩॥

ધર્મમૂલે સત્યદાને ॥ ૪॥

ધર્મેણ જયતિ લોકાન્ ॥ ૫॥

મૃત્યુરપિ ધર્મિષ્ઠં રક્ષતિ ॥ ૬॥

ધર્માદ્વિપરીતં પાપં યત્ર યત્ર પ્રસજ્યતે
તત્ર તત્ર ધર્માવમતિરેવ મહતી પ્રસજ્યતે ॥ ૭॥

ઉપસ્થિતવિનાશાનાં પ્રકૃતિઃ આકારેણ કાર્યેણ ચ લક્ષ્યતે ॥ ૮॥

આત્મવિનાશં સૂચયત્યધર્મબુદ્ધિઃ ॥ ૯॥

પિશુનવાદિનો રહસ્યં કુતઃ ॥ ૧૦॥

પરરહસ્યં નૈવ શ્રોતવ્યમ્ ॥ ૧૧॥

વલ્લભસ્ય સ્વાર્થપરત્વમધર્મયુક્તમ્ ॥ ૧૨॥

સ્વજનેષ્વપ્યતિક્રમો ન કર્તવ્યઃ ॥ ૧૩॥

મતાઽપિ દુષ્ટા ત્યાજ્યા ॥ ૧૪॥

સ્વહસ્તોઽપિ વિષદિગ્ધશ્છેદ્યઃ ॥ ૧૫॥

પરોઽપિ ચ હિતો બન્ધુઃ ॥ ૧૬॥

કક્ષાદપ્યૌષધં ગૃહ્યતે ॥ ૧૭॥

નાસ્તિ ચોરેષુ વિશ્વાસઃ ॥ ૧૮॥

અપ્રતીકારેષ્વનાદરો ન કર્તવ્યઃ ॥ ૧૯॥

વ્યસનં મનાગપિ બાધતે ॥ ૨૦॥

અમરવદર્થજાતમાર્જયેત્ ॥ ૨૧॥

અર્થવાન્ સર્વલોકસ્ય બહુમતઃ ॥ ૨૨॥

મહેન્દ્રમપ્યર્થહીનં ન બહુમન્યતે લોકઃ ॥ ૨૩॥

દારિદ્ર્યં ખલુ પુરુષસ્ય સજીવિતં મરણમ્ ॥ ૨૪॥

વિરૂપોઽપ્યર્થવાન્ સુરૂપઃ ॥ ૨૫॥

અદાતારમપ્યર્થવન્તમર્થિનો ન ત્યજન્તિ ॥ ૨૬॥

અકુલીનોઽપિ ધનવાન્ કુલીનાદ્વિશિષ્ટઃ ॥ ૨૭॥

નાસ્ત્યવમાનભયમનાર્યસ્ય ॥ ૨૮॥

નોદ્યોગવતાં વૃત્તિભયમ્ ॥ ૨૯॥

ન જિતેન્દ્રિયાણાં વિષયભયમ્ ॥ ૩૦॥

ન કૃતાર્થાનાં મરણભયમ્ ॥ ૩૧॥

કસ્યચિદર્થં સ્વમિવ મન્યતે સાધુઃ ॥ ૩૨॥

પરવિભવેષ્વાદરો ન કર્તવ્યઃ ॥ ૩૩॥

પરવિભવેષ્વાદરોઽપિ નાશમૂલમ્ ॥ ૩૪॥

પલાલમપિ પરદ્રવ્યં ન હર્તવ્યમ્ ॥ ૩૫॥

પરદ્રવ્યાપહરણમાત્મદ્રવ્યનાશહેતુઃ ॥ ૩૬॥

ન ચૌર્યાત્ પરં મૃત્યુપાશઃ ॥ ૩૭॥

યવાગૂરપિ પ્રાણધારણં કરોતિ કાલે ॥ ૩૮॥

ન મૃતસ્યૌષધં પ્રયોજનમ્ ॥ ૩૯॥

સમકાલે પ્રભુત્વસ્યપ્રયોજનં ભવતિ ॥ ૪૦॥

નીચસ્ય વિદ્યાઃ પાપકર્મણ્યેવ તં યોજયન્તિ ॥ ૪૧॥

પયઃપાનમપિ વિષવર્ધનં ભુજઙ્ગસ્ય ન ત્વમૃતં સ્યાત્ ॥ ૪૨॥

ન ધાન્યસમો હ્યર્થઃ ॥ ૪૩॥

ન ક્ષુધાસમઃ શત્રુઃ ॥ ૪૪॥

અકૃતેર્નિયતા ક્ષુત્ ॥ ૪૫॥

નાસ્ત્યભક્ષં ક્ષુધિતસ્ય ॥ ૪૬॥

ઇન્દ્રિયાણિ પ્રતિપદં નરાન જરાવશાન્ કુર્વન્તિ ॥ ૪૭॥

સાનુક્રોશં ભર્તારમાજીવેત્ ॥ ૪૮॥

લુબ્ધસેવી પાવકેચ્છયા ખદ્યોતં ધમતિ ॥ ૪૯॥

વિશેષજ્ઞં સ્વામિનમાશ્રયેત્ ॥ ૫૦॥

પુરુષસ્ય મૈથુનં જરા ॥ ૫૧॥

સ્ત્રીણામમૈથુનં જરા ॥ ૫૨॥

ન નીચોત્તમયોર્વિવાહઃ ॥ ૫૩॥

અગમ્યાગમનાદાયુર્યશઃ પુણ્યાનિ ક્ષીયન્તે ॥ ૫૪॥

નાસ્ત્યહઙ્કારસમઃ શત્રુઃ ॥ ૫૫॥

સંસદિ શત્રુ ન પરિક્રોશેત ॥ ૫૬॥

શત્રુવ્યસનં શ્રવણસુખમ્ ॥ ૫૭॥

અધનસ્ય બુદ્ધિર્ન વિદ્યતે ॥ ૫૮॥

હિતમપ્યધનસ્ય વાક્યં ન ગૃહ્યતે ॥ ૫૯॥

અધનઃ સ્વભાર્યયાઽપ્યવમન્યતે ॥ ૬૦॥

પુષ્પહીનં સહકારમપિ નોપાસતે ભ્રમરાઃ ॥ ૬૧॥

ઇતિ ચતુર્થોઽધ્યાયઃ ॥

અથ પઞ્ચમોઽધ્યાયઃ ॥

વિદ્યા ધનમધનાનામ્ ॥ ૧॥

વિદ્યા ચોરૈરપિ ન ગ્રાહ્યા ॥ ૨॥

વિદ્યા સુલભા ખ્યાતિઃ ॥ ૩॥

યશઃ શરીરં ન વિનશ્યતિ ॥ ૪॥

યઃ પરાથમન્યમુપસર્પતિ સ સત્પુરુષઃ ॥ ૫॥

ઇન્દ્રિયાણાં પ્રશમં શાસ્ત્રમ્ ॥ ૬॥

અકાર્યપ્રવૃત્તેઃ શાસ્ત્રાઙ્કુશં નિવારયતિ ॥ ૭॥

નીચસ્ય વિદ્યા નોપેતવ્યા ॥ ૮॥

મ્લેચ્છભાષણં ન શિક્ષેત ॥ ૯॥

મ્લેચ્છાનામપિ સુવૃત્તં ગ્રાહ્યમ્ ॥ ૧૦॥

ગુણે ન મત્સરઃ કર્તવ્યઃ ॥ ૧૧॥

શત્રોરપિ સુગુણો ગ્રાહ્યઃ ॥ ૧૨॥

વિષાદપ્યમૃતં ગ્રાહ્યમ્ ॥ ૧૩॥

અવસ્થયા પુરુષઃ સંમાન્યતે ॥ ૧૪॥

સ્થાન એવ નરાઃ પૂજ્યન્તે ॥ ૧૫॥

આર્યવૃતમનુતિષ્ઠેત્ ॥ ૧૬॥

કદાપિ મર્યાદાં નાતિક્રામેત્ ॥ ૧૭॥

નાસ્ત્યર્ઘઃ ઓઉરુષરત્નસ્ય ॥ ૧૮॥

ન સ્ત્રીરત્નસમં રત્નમ્ ॥ ૧૯॥

સુદુર્લભં હિ રત્નમ્ ॥ ૨૦॥

અયશો ભયં ભયેષુ ॥ ૨૧॥

નાસ્ત્યલસસ્ય શાસ્ત્રાધિગમઃ ॥ ૨૨॥

ન સ્ત્રૈણસ્ય સ્વર્ગાપ્તિર્ધર્મકૃત્યં ચ ॥ ૨૩॥

સ્ત્રિયોઽપિ સ્ત્રૈણમવમન્યન્તે ॥ ૨૪॥

ન પુષ્પાર્થી સિઞ્ચતિ શુષ્કતરુમ્ ॥ ૨૫॥

અદ્રવ્યપ્રયત્નો વાલિકાક્વાથનાદનન્યઃ ॥ ૨૬॥

ન મહાજનહાસઃ કર્તવ્યઃ ॥ ૨૭॥

કાર્યસમ્પદં નિમિત્તાનિ સૂચયન્તિ ॥ ૨૮॥

નક્ષત્રાદપિ નિમિત્તાનિ વિશેષયન્તિ ॥ ૨૯॥

ન ત્વરિતસ્ય નક્ષત્રપરીક્ષા ॥ ૩૦॥

પરિચયે દોષા ન છદ્યન્તે ॥ ૩૧ ।
સ્વયમશુદ્ધઃ પરાનાશઙ્કતે ॥ ૩૨॥

સ્વભાવો દુરતિક્રમઃ ॥ ૩૩॥

અપરાધાનુરૂપો દણ્ડઃ ॥ ૩૪॥

પ્રશ્નાનુરૂપં પ્રતિવચનમ્ ॥ ૩૫॥

વિભવાનુરૂપમાભરણમ્ ॥ ૩૬॥

કુલાનુરૂપં વૃતમ્ ॥ ૩૭॥

કાર્યાનુરૂપઃ પ્રયત્નઃ ॥ ૩૮॥

પાત્રાનુરૂપં દાનમ્ ॥ ૩૯॥

વયોઽનુરૂપઓ વેષઃ ॥ ૪૦॥

સ્વામ્યનુકૂલો ભૃત્યઃ ॥ ૪૧॥

ભતૃવશવર્તિની ભાર્યા ॥ ૪૨॥

ગુરુવશાનુવર્તી શિષ્યઃ ॥ ૪૩॥

પિતૃવશાનુવર્તી પુત્રઃ ॥ ૪૪॥

અત્યુપચારઃ શઙ્કિતવ્યઃ ॥ ૪૫॥

સ્વામિનિ કુપિતે સ્વામિનમેવાનુવર્તેત ॥ ૪૬॥

માતૃતાડિતો વત્સો માતરમેવાનુરોદિતિ ॥ ૪૭॥

સ્નેહવતઃ સ્વલ્પો હિ રોષઃ ॥ ૪૮॥

બાલિશઃ આત્મછિદ્રં ન પશ્યતિ અપિ તુ પરચ્છિદ્રમેવ પશ્યતિ ॥ ૪૯॥

સદોપચારઃ કિતવઃ ॥ ૫૦॥

કામ્યૈર્વિશેષૈરુપચારમુપચારઃ ॥ ૫૧॥

ચિરપરિચિતાનામત્યુપચારઃ શઙ્કિતવ્યઃ ॥ ૫૨॥

શ્વસહસ્રાદેકાકિની ગૌઃ શ્રેયસી ॥ ૫૩॥

શ્વો મયૂરાદદ્ય કપોતો વરઃ ॥ ૫૪॥

અતિસઙ્ગો દોષમુત્પાદયતિ ॥ ૫૫॥

સર્વં જયત્યક્રોધઃ ॥ ૫૬॥

યદ્યપકારિણી કોપઃ કર્તવ્યઃ તર્હિ સ્વકોપે એવકોપઃ કર્તવ્યઃ ॥ ૫૭॥

મતિમત્સુ મૂર્ખમિત્રગુરુવલ્લભેષુ વિવાદો ન કર્તવ્યઃ ॥ ૫૮॥

નાસ્ત્યપિશાચમૈશ્વર્યમ્ ॥ ૫૯॥

નાસ્તિ ધનવતાં સુકર્મસુ શ્રમઃ ॥ ૬૦॥

નાસ્તિ ગતિશ્રમો યાનવતામ્ ॥ ૬૧॥

અલોહમયં નિગડં કલત્રમ્ ॥ ૬૨॥

યો યસ્મિન્ કર્મણિ કુશલઃ સ તસ્મિન્ યોક્તવ્યઃ ॥ ૬૩॥

દુષ્કલત્રં મનસ્વિનાં શરીરકર્શનમ્ ॥ ૬૪॥

અપ્રમત્તો દારાન્ નિરીક્ષેત ॥ ૬૫॥

સ્ત્રીષુ કિંચિદપિ ન વિશ્વસેત્ ॥ ૬૬॥

ન સમાધિઃ સ્ત્રીષુ લોકજ્ઞતા ચ ॥ ૬૭॥

ગુરૂણાં માતા ગરીયસી ॥ ૬૮॥

સર્વાવસ્થાસુ માતા ભર્તવ્યા ॥ ૬૯॥

વૈરુપ્યમલઙ્કારેણાચ્છાદ્યતે ॥ ૭૦॥

સ્ત્રીણાં ભૂષણં લજ્જા ॥ ૭૧॥

વિપ્રાણાં ભૂષણં વેદઃ ॥ ૭૨॥

સર્વેષાં ભૂષણં ધર્મઃ ॥ ૭૩॥

ભૂષણાનાં ભૂષણં સવિનય વિદ્યા ॥ ૭૪॥

ઇતિ પઞ્ચમોઽધ્યાયઃ ॥

અથ ષષ્ઠોઽધ્યાયઃ ॥

અનુપદ્રવં દેશમાવસેત્ ॥ ૧॥

સાધુજનબહુલો દેશઃ આશ્રયણીયઃ ॥ ૨॥

રાજ્ઞો ભેતવ્યં સાર્વકાલમ્ ॥ ૩॥

ન રાજ્ઞઃ પરં દૈવતમ્ ॥ ૪॥

સુદૂરમપિ દહતિ રાજવહ્નિઃ ॥ ૫॥

રિક્તહસ્તો ન હાજાનમભિગચ્છેત્ ગુરું દૈવે ચ ॥ ૬॥

કુટિમ્બિનો ભેતવ્યમ્ ॥ ૭॥

ગન્તવ્યં ચ સદા રાજકુલમ્ ॥ ૮॥

રાજપુરુષૈઃ સમ્બન્ધં કુર્યાત્ ॥ ૯॥

હાજદાશી ન સેવિતવ્યા ॥ ૧૦॥

ન ચક્ષુષાઽપિ રાજાનં નિરીક્ષેત ॥ ૧૧॥

પુત્રે ગુણવતિ કુટુમ્બિનઃ સ્વર્ગઃ ॥ ૧૨॥

પુત્રા વિદ્યાનાં પારં ગમયિતવ્યાઃ ॥ ૧૩॥

જનપદાર્થં ગ્રામં ત્યજેત્ ॥ ૧૪॥

ગ્રામાર્થં કુટુમ્બસ્ત્યજતે ॥ ૧૫॥

અતિલાભઃ પુત્રલાભઃ ॥ ૧૬॥

દુર્ગતેરયઃ પિતરૌ રક્ષતિ સ પુત્રઃ ॥ ૧૭॥

યઃ કુલં પ્રખ્યાપયતિ સ પુત્રઃ ॥ ૧૮॥

નાનપત્યસ્ય સ્વર્ગઃ ॥ ૧૯॥

યા પ્રસૂતે સા ભાર્યા ॥ ૨૦॥

તીર્થસમવાયે પુત્રવતીમનુગચ્છેત્ ॥ ૨૧॥

ન તીર્થાભિગમનાદ્બ્રહ્મચર્યં નશ્યતિ ॥ ૨૨॥

ન પરક્ષેત્રે બીજં વિનિક્ષિપેત્ ॥ ૨૩॥

પુત્રાર્થા હિ સ્ત્રિયઃ ॥ ૨૪॥

સ્વદાસીપરિગ્રહો હિ સ્વસ્યૈવ દાસભાવાપાદનમ્ ॥ ૨૫॥

ઉપસ્થિતવિનાશઃ પથ્યવાક્યં ન શ ૃણોતિ ॥ ૨૬॥

નાસ્તિ દેહિનાં સુખદુઃખાભાવઃ ॥ ૨૭॥

માતરમિવ વત્સાઃ સુખદુઃખાનિ કર્તારમેવાનુગચ્છન્તિ ॥ ૨૮॥

તિલમાત્રમપ્યુપકારં શૈલમાત્રં મન્યતે સાધુઃ ॥ ૨૯॥

ઉપકારોઽનાર્યેષ્વકર્તવ્યઃ ॥ ૩૦॥

પ્રત્યુપકારભયાદનાર્યઃ શત્રુર્ભવતિ ॥ ૩૧॥

સ્વલ્પોપકારકૃતેઽપિ પ્રત્યુપકારં કર્તુમાર્યો જાગર્તિ ॥ ૩૨॥

ન કદાઽપિ દેવતા મન્તવ્યા ॥ ૩૩॥

ન ચક્ષુષઃ સમં જ્યોતિરસ્તિ ॥ ૩૪॥

ચક્ષુર્હિ શરીરિણાં નેતા ॥ ૩૫॥

અપચક્ષુષઃ કિં શરીરેણ ॥ ૩૬॥

નાપ્સુ મૂત્રં કુર્યાત્ ॥ ૩૭॥

ન નગ્નો જલં પ્રવિશેત્ ॥ ૩૮॥

યથા શરીરં તથા જ્ઞાનમ્ ॥ ૩૯॥

યથા બુદ્ધિસ્તથા વિભવઃ ॥ ૪૦॥

અગ્વાવક્નિં ન નિઙ્પિેત્ ॥ ૪૧॥

તપસ્વિનઃ પૂજનીયાઃ ॥ ૪૨॥

પરદારાન્ ન ગચ્છેત્ ॥ ૪૩॥

અન્નદાનં ભ્રૂણહત્યામપિ માર્ષ્ટિ ॥ ૪૪॥

ન વેદબાહ્યો ધર્મઃ ॥ ૪૫॥

કથંચિદપિ ધર્મં નિષેવેત ॥ ૪૬॥

સ્વર્ગં નયતિ સૂનૃતમ્ ॥ ૪૭॥

નાસ્તિ સત્યાત્ પરં તપઃ ॥ ૪૮॥

સત્યં સ્વર્ગસ્ય સાધનમ્ ॥ ૪૯॥

સત્યેન ધાર્યતે લોકઃ ॥ ૫૦॥

સત્યાદ્દેવો વર્ષતિ ॥ ૫૧॥

નાનૃતાત્ પાતકં પરમ્ ॥ ૫૨॥

ન મીમાંસ્યા ગુરવઃ ॥ ૫૩॥

ખલત્વં નોપેયાત્ ॥ ૫૪॥

નાસ્તિ ખલસ્ય મિત્રમ્ ॥ ૫૫॥

લોકયાત્રા દરિદ્રં બાધતે ॥ ૫૬॥

અતિશૂરો દાનશૂરઃ ॥ ૫૭॥

ગુરુદેવબ્રાહ્મણેષુ ભક્તિર્ભૂષણમ્ ॥ ૫૮॥

સર્વસ્ય ભૂષણં વિનયઃ ॥ ૫૯॥

અકુલીનોઽપિ વિનીતઃ કુલીનાત્વિશિષ્ટઃ ॥ ૬૦॥

આચારાદાયુર્વર્ધતે કીર્તિઃ શ્રેયશ્ચ ॥ ૬૧॥

પ્રિયમપ્યહિતં ન વક્તવ્યમ્ ॥ ૬૨॥

બહુજનવિરુદ્ધમેકં નાનુવર્તેત ॥ ૬૩॥

ન કૃતાર્થસ્ય નીચેષુ સમ્બન્ધઃ ॥ ૬૪॥

ઋણશત્રુવ્યાધયો નિઃશેષાઃ કર્તવ્યાઃ ॥ ૬૫॥

ભૂત્યનુવર્તનં પુરુષસ્ય રસાયનમ્ ॥ ૬૬॥

નાર્થિષ્વવજ્ઞા નરકાન્નિવર્તનમ્ ॥ ૬૭॥

દુષ્કરં કર્મ કારયિત્વા કર્તારમવમન્યતે નીચઃ ॥ ૬૮॥

નાકૃતજ્ઞસ્ય નરકાન્નિવર્તનમ્ ॥ ૬૯॥

જિહ્વાયત્તૌ વૃદ્ધિવિનાશૌ ॥ ૭૦॥

વિષયામૃતયોરાકરી જિહ્વા ॥ ૭૧॥

પ્રિયવાદિનો ન શત્રુઃ ॥ ૭૨॥

સ્તુતા અપિ દેવતાસ્તુષ્યન્તિ ॥ ૭૩॥

અનન્તમપિ દુર્વચનં ચિરં તિષ્ઠતિ ॥ ૭૪॥

રાજદ્વિષ્ટં ન વક્તવ્યમ્ ॥ ૭૫॥

શ્રુતિસુખાત્ કોકિલાનાપાદપિ તુષ્યન્તિ જનાઃ ॥ ૭૬॥

સ્વધર્મહેતુઃ સત્પુરુષઃ ॥ ૭૭॥

નાસ્ત્યર્થિનો ગૌરવમ્ ॥ ૭૮॥

સ્ત્રીણાં ભૂષણં સૌભાગ્યમ્ ॥ ૭૯॥

શત્રોરપિ ન પાતનીય વૃત્તિઃ ॥ ૮૦॥

અપ્રયત્નોદકં ક્ષેત્રમ્ ॥ ૮૧॥

એરણ્ડમવલમ્બ્ય કુઞ્જરં ન કોપયેત્ ॥ ૮૨॥

અતિપ્રવૃદ્ધાપિ શાલ્મલી વારણસ્તમ્ભો ન ભવતિ ॥ ૮૩॥

અતિદીર્ઘોઽપિ કર્ણિકારો ન મુસલી ભવતિ ॥ ૮૪॥

અતિદીપ્તોઽપિ ખદ્યોતો ન પાવકઃ ॥ ૮૫॥

ન પ્રવૃદ્ધત્વં ગુણહેતુઃ ॥ ૮૬॥

સુજીર્ણોઽપિ પુચુમલ્દો ન શઙ્કુલાયતે ॥ ૮૭॥

યથા બીજં તથા નિષ્પત્તિઃ ॥ ૮૮॥

યથા શ્રુતં તથા બુદ્ધિઃ ॥ ૮૯॥

યથા કુલં તથાऽऽચારમ્ ॥ ૯૦॥

સંસ્કૃતઃ પિચુમન્દો ન સહકારો ભવતિ ॥ ૯૧॥

ન ચાગતં સુખં ત્યજેત્ ॥ ૯૨॥

સ્વયમેવ દુઃખમધિગચ્છતિ ॥ ૯૩॥

રાત્રિચારણં ન કુર્યાત્ ॥ ૯૪॥

ન ચાર્ધરાત્રં સ્વપેત્ ॥ ૯૫॥

તદ્વિદ્વિદ્ભિઃ પરીક્ષેત ॥ ૯૬॥

પરગૃહમકારણતો ન પ્રવિશેત્ ॥ ૯૭॥

જ્ઞાત્વાऽપિ દોષમેવ કરોતિ લોકઃ ॥ ૯૮॥

શાસ્ત્રપ્રધાના લોકવૃત્તિઃ ॥ ૯૯॥

શાસ્ત્રાભાવે શિષ્ટાચારમનુગચ્છેત્ ॥ ૧૦૦॥

નાચરિતાચ્છસ્ત્રં ગરીયઃ ॥ ૧૦૧॥

દૂરસ્થમપિ ચાચક્ષુઃ પશ્યતિ રાજા ॥ ૧૦૨॥

ગતાનુગતિકો લોકઃ ॥ ૧૦૩॥

યમનુજીવેત્ તં નાપવદેત્ ॥ ૧૦૪॥

ઇતિ ષષ્ઠોऽધ્યાયઃ ॥

અથ સપ્તમોऽધ્યાયઃ ॥

તપસ્સાર ઇન્દ્રિયનિગ્રહઃ ॥ ૧॥

દુર્લભઃ સ્ત્રીબન્ધનાન્મોક્ષઃ ॥ ૨॥

સ્ત્રીનામ સર્વાશુભાનાં ક્ષેત્રમ્ ॥ ૩॥

ન ચ સ્ત્રીણાં પુરુષપરીક્ષા ॥ ૪॥

સ્ત્રીણાં મનઃ ક્ષણિકમ્ ॥ ૫॥

અશુભદ્વેષિણઃ સ્ત્રીષુ ન પ્રસક્તા ભવેયુઃ ॥ ૬॥

યજ્ઞફલજ્ઞાસ્ત્રિવેદવિદઃ ॥ ૭॥

સ્વર્ગસ્થાનં ન શાશ્વતં અપિ તુ યાનત્પુણ્યફલમ્ ॥ ૮॥

ન ચ સ્વર્ગપતનાત્ પરં દુઃખમ્ ॥ ૯॥

દેહી દેહં ત્યક્ત્વા ઐન્દ્રપદં ન વાઞ્છતિ ॥૧૦॥

દુઃખાનામૌષધં નિર્વાણમ્ ॥ ૧૧॥

અનાર્યસમ્બન્ધાદ્વરમાર્યશત્રુતા ॥ ૧૨॥

નિહન્તિ દુર્વચનં કુલમ્ ॥ ૧૩॥

ન પુત્રસંસ્પર્શાત્ પરં સુખમ્ ॥ ૧૪॥

વિવાદે ધર્મમનુસ્મરેત્ ॥ ૧૫॥

નિશાન્તે કાર્યં ચિન્તયેત્ ॥ ૧૬॥

પ્રદોષે ન સંયોગઃ કર્તવ્યઃ ॥ ૧૭॥

ઉપસ્થિતવિનાશઃ દુર્નયં શુભં મન્યતે ॥ ૧૮॥

ક્ષીરાર્થિનઃ કિં કરિણ્યા ॥ ૧૯॥

ન દાનસમં વશ્યમ્ ॥ ૨૦॥

પરાયત્તેષૂત્કણ્ઠાં ન કુર્યાત્ ॥ ૨૧॥

અત્સમૃદ્ધિરસદ્ભરેવ ભુજ્યતે ॥ ૨૨॥

નિમ્બફલં કાકૈર્હિ ભુજ્યતે ॥ ૨૩॥

નામ્ભોધિસ્તૃષ્ણામપોહતિ ॥ ૨૪॥

વાલિકા અપિ સ્વગુણમાશ્રયન્તે ॥ ૨૫॥

સન્તોઽસત્સુ ન રમન્તે ॥ ૨૬॥

હંસઃ પ્રતવને ન રમતે ॥ ૨૭॥

અર્થાર્થં પ્રવર્તતે લોકઃ ॥ ૨૮॥

આશયા બધ્યતે લોકઃ ॥ ૨૯॥

ન ચ આશાપરૈઃ શ્રી સહ તિષ્ઠતિ ॥ ૩૦॥

આશાપરે ન ધૈર્યમ્ ॥ ૩૧॥

દૈન્યાન્મરણમુત્તમમ્ ॥ ૩૨॥

આશાલજ્જાં વ્યપોહતિ ॥ ૩૩॥

ન માત્રા સહ વાશઃ કર્તવ્યઃ ॥ ૩૪॥

આત્મા ન સ્તોતવ્યઃ ॥ ૩૫॥

ન દિવા સ્વપ્નં કુર્યાત્ ॥ ૩૬॥

ન ચાસન્નપિ પશ્યત્યૈશ્વર્યાન્ધઃ નાપિ શ્રુણોતીષ્ટં વાક્યમ્ ॥ ૩૭॥

સ્ત્રીણાં ન ભરિતુઃ પરં દૈવતમ્ તદનુવર્તનં તાસામુભયસૌખ્યમ્ ॥ ૩૮॥

અતિથિઅભ્યાગતં ચ પૂજયેદ્યથાવિધિ ॥ ૩૯॥

નાસ્તિ હવ્યસ્ય વ્યાઘાતઃ ॥ ૪૦॥

શત્રુર્મિત્રવત્ પ્રતિભાતિ ॥ ૪૧॥

મૃગતૃષ્ણા જલવદ્ભાતિ હિ ॥ ૪૨॥

ઇતિ સપ્તમોऽધ્યાયઃ ॥

અથાષ્ટમોऽધ્યાયઃ ॥

ધુરમેધસોऽસચ્છાસ્ત્રં મોહયતિ ॥ ૧॥

સત્સઙ્ગઃ સ્વર્ગવાસઃ ॥ ૨॥

આર્યાઃ સ્વમિવ પરં મન્વતે ॥ ૩॥

રૂપાનુવર્તી ગુણઃ ॥ ૪॥

યત્ર સુખેન વર્તતે તદેવ સ્થાનમ્ ॥ ૫॥

વિશ્વાસઘાતિનો ન નિષ્કૃતિઃ ॥ ૬॥

દૈવાયત્તં ન શોચેત્ ॥ ૭॥

આશ્રિતદુઃખમાત્મન ઇવ મન્યતે સાધુઃ ॥ ૮॥

હૃદ્ગતમાચ્છાદ્યાન્યદ્વદત્યનાર્યઃ ॥ ૯॥

બુદ્ધિહીનઃ પિશાચતુલ્યઃ ॥ ૧૦॥

અસહાયઃ પથિ ન ગચ્છેત્ ॥ ૧૧॥

પુત્રો ન સ્તોતવ્યઃ ॥ ૧૨॥

સ્વામી સ્તોતવ્યોઽનુજીવિભિઃ ॥ ૧૩॥

ધર્મકૃત્યાનિ સર્વાણિ સ્વામિન ઇત્યેવ ઘોષયેત્ ॥ ૧૪॥

રાજાજ્ઞાં નાતિલઙ્ઘયેત્ ॥ ૧૫॥

યથાઽઽજ્ઞપ્તં તથા કુર્યાત્ ॥ ૧૬॥

નાસ્તિ બુદ્ધિમતાં શત્રુઃ ॥ ૧૭॥

આત્મછિદ્રં ન પ્રકાશયેત્ ॥ ૧૮॥

ક્ષમાવાનેવ સર્વં સાધયતિ ॥ ૧૯॥

આપદર્થં ધનં રક્ષેત્ ॥ ૨૦॥

સાહસવતાં પ્રાયં કર્તવ્યમ્ ॥ ૨૧॥

શ્વઃ કાર્યમદ્ય કુર્વીત ॥ ૨૨॥

આપરાહ્ણિકં પૂર્વાહ્ણ એવ કર્તવ્યમ્ ॥ ૨૩॥

વ્યવહારાનુલોમો ધર્મઃ ॥ ૨૪॥

સર્વજ્ઞાતા લોકજ્ઞતા ॥ ૨૫॥

શાસ્ત્રજ્ઞોઽપ્યલોકજ્ઞો મૂર્ખતુલ્યઃ ॥ ૨૬॥

શાત્રપ્રયોજનં તત્ત્વદર્શનમ્ ॥ ૨૭॥

તત્ત્વજ્ઞાનં કાર્યમેવ પ્રકાશયતિ ॥ ૨૮॥

વ્યવહારે પક્ષપાતો ન કર્તવ્યઃ ॥ ૨૯॥

ધર્માદપિ વ્યવહારો ગરીયાન્ ॥ ૩૦॥

આત્મા હિ વ્યવહારસ્ય સાક્ષી ॥ ૩૧॥

સર્વસાક્ષી હ્યાત્મા ॥ ૩૨॥

ન સ્યાત્ કૂટસાક્ષી ॥ ૩૩॥

કૂટસાક્ષિણો નરકે પતન્તિ ॥ ૩૪॥

પ્રચ્છન્નપાપાનાં સાક્ષિણો મહાભૂતાનિ ॥ ૩૫॥

આત્મનઃ પાપમાત્મૈવ પ્રકાશયતિ ॥ ૩૬॥

વ્યવહારોઽન્તર્ગતમાકારઃ સૂચયતિ ॥ ૩૭॥

આકારસંવરણં દેવાનામપ્યશક્યમ્ ॥ ૩૮॥

ચોરરાજપુરુષેભ્યો વિત્તં રક્ષેત્ ॥ ૩૯॥

દુર્દર્શના હિ રાજાનઃ પ્રજા રક્ષન્તિ ॥ ૪૦॥

સુદર્શના રાજાનઃ પ્રજા રક્ષન્તિ ॥ ૪૧॥

ન્યાયયુક્તં રાજાનં માતરં મન્યન્તે પ્રજાઃ ॥ ૪૨॥

તાદૃશઃ સ રાજા ઇહ સુખં તતઃ સ્વર્ગણ્ ચાપ્નોતિ ॥ ૪૩॥

અહિંસાલક્ષણો ધર્મઃ ॥ ૪૪॥

સ્વશરીરમપિ પરશરીરં મન્યતે સાધુઃ ॥ ૪૫॥

માંસભક્ષણમપ્યુક્તં સર્વેષામ્ ॥ ૪૬॥

ન સંસારભયં જ્ઞાનવતામ્ ॥ ૪૭॥

વિજ્ઞાનદીપેન સંસારભયં નિવર્તયતિ ॥ ૪૮॥

સર્વમવિત્યં ભવતિ ॥ ૪૯॥

કૃમિશકૃન્મૂત્રભાચનં શરીરં પુણ્યતયપાપજન્મહેતુઃ ॥ ૫૦॥

જન્મમરણાદિષુ તુ દુઃખમેવ ॥ ૫૧॥

તપસા સ્વર્ગમાપ્નોતિ ॥ ૫૨॥

ક્ષમાયુક્તસ્ય તપો વિવર્ધતે ॥ ૫૩॥

તસ્માત્ સર્વેષાં સર્વકાર્યસિદ્ધિર્ભવતિ ॥ ૫૪॥

ઇત્યષ્ટમોઽધ્યાયઃ ॥

ઇતિ કૌટિલીયાનિ નીતિસૂત્રાણિ સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi

Chanakya (Kautilya) Niti Sutra

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*